P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-6* ISSUE-8* (Part-1) April- 2019
E: ISSN NO.: 2349-980X **Shrinkhla Ek Shodhparak Vaicharik Patrika**

# शृङ्गारविलासे अपह्नुत्यलङ्कारस्य प्रयोगः



**जा. कृष्णन्**
मार्गनिर्देशकः,
संस्कृत विभागः,
पण्डिचेरीविश्वविद्यालयः
पण्डिचेरी, भारत



**देवस्मिता बारिक**
शोधच्छात्रा,
संस्कृत विभागः,
पण्डिचेरीविश्वविद्यालयः
पण्डिचेरी, भारत

**सारांश**

संस्कृतसाहित्ये जगन्नाथनाम्ना बहवः कवयः सन्ति। तेषु पण्डितराजजगन्नाथः स्वतन्त्र एव। जगन्नाथनाम्ना ते कवयः तु पण्डितोपाधिना नाभूषिताः। काव्यालङ्कारजगति विद्यमानेषु आलङ्कारिकेषु पण्डितराजजगन्नाथः सर्वोत्कृष्टस्थानं भजते। पण्डितराजजगन्नाथस्य विरचिताः ग्रन्थाः सर्वेषां सहृदयानां मनसि सततं आनन्दम् जनयति। अलङ्कारतत्त्वकाव्ये भामह–रुद्रट–भरतप्रभृतयः काव्यस्यात्मा अलङ्कारः इति आमनन्ति। सः न केवलं आलङ्कारिकः अपि तु कविश्च आसीत्। स आलङ्कारिकसन्नपि विविधानि काव्यान्यपि रचयामास। तस्य कृतिषु 'भामिनीविलासः' अन्यतमः। पण्डितराजकृते भामिनीविलासे प्रत्येकपद्यं तस्य भिन्नं भिन्नं अर्थं प्रतिपादयति। अयं ग्रन्थः प्रसङ्गानुसारेण पद्यानाम् संग्रहः एव। विद्वांसः वदन्ति–यत् पण्डितराजजगन्नाथः तस्य पत्न्याः नामानुसारेण भामिनीविलासस्य नामकरणं कृतवानिति। अमरकोषानुसारेण 'भामिनी' इत्यस्याः अर्थः कोपयुक्ता स्त्री तथा विलासस्त्रीणां शृंगारभावात् उत्पन्नाः क्रियाविशेषाः इति च। साहित्यदर्पणे उक्तं–

"यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्।
विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना"।। इति।।[1]

चलनं तथा मुखनेत्राणां व्यापाराणाम् विशिष्टता इति विलासः। भामिन्याः विलासाः यस्मिन् स ग्रन्थः भामिनीविलासः। वस्तुतः अयं प्रतिष्ठितग्रन्थः तु पण्डितराजजगन्नाथस्य अनुपमकाव्यचमत्कारस्य अत्युत्कृष्टतमं उदाहरणमेव। 'भामिनीविलासः' तस्यकवितायाः 'अद्भुतविलासः' इति। भामिनीविलासे चत्वारः विलासाः वर्तन्ते। यथा–1–प्रस्ताविकविलासः 2–शृङ्गारविलासः, 3–करुणविलासः,4–शान्तविलासः। कृतिषु भामिनीविलासस्य शृङ्गारविलासे अपह्नुति–अलंकारस्य प्रयोगः अत्युत्तमरूपेण दरीदृश्यते। अतः शृङ्गारविलासे अपह्नुतिः अर्थालंकारस्य वैशिष्ट्यं स्वरूपं च दर्शयितुं इच्छामि इति।

**मुख्य शब्द :** 'भामिनीविलासः, पद्यं, पण्डितराजजगन्नाथः, अलङ्कारः, अपह्नुतिः, शब्दालंकारः, अर्थालंकारः, उभयालंकारः, काव्यं, उदाहरणम्, वैशष्ट्यम्, स्वरूपम्।

**प्रस्तावना**

शोधकार्यं समाजस्य काठिन्यं दूरीकरोति,नूतनतथ्यमुत्पाद्य व्यावहारिकं आनयति। अतः शोधकार्यं सर्वदैव समस्यावहुलस्य साधनम्। शोधकार्यं विना नवनववस्तूनाम् उदभावः नैव दृश्यते। भौतिकजगतः दृश्यमानं काव्यजातं सर्वं शोधकार्येण परिपूरितं भवति। पण्डितराजजगन्नाथः महापण्डितः आसीत्।तस्य काव्ये अलंकारशास्त्रस्य चर्चा तथा प्रतिपादनेन सः सिद्धहस्तः एव। सः पाण्डित्येन अलंकारशास्त्रस्य परिष्करणं कृत्वा तस्य कार्यं उत्तमरुपेण प्रतिपादनं करोति। अलंकारो नाम सौन्दर्यम्। संस्कृतसाहित्ये अलंकारस्य स्थानं तु सर्वाग्रे वर्तते। यथा कटक–कुण्डल–हारादिभिः आभूषणैः कामिन्याः सौन्दर्यवृद्धिः भवति। तथैव अनुप्रासोपमादिभिः अलङ्कारैः कविताकामिन्याः शोभावर्धनं क्रियते। आचार्यमम्मटेनापि उक्तम्–

"उपकुर्वन्ति तं सन्न येऽङ्गद्वारेण जातुचित्।
हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः"।। इति।।[2]

**प्रस्तावित शोधकार्यस्य उद्देश्याणि**

अतएव मम शोधप्रबन्धमाध्यमेन जनानाम् मङ्गलाय इदं भामिनीविलासस्योपरि अपह्नुति–अर्थाअलंकारस्य महत्वम् तु दर्शयितुं इच्छामि इति। पण्डितराजजगन्नाथस्य मतेन अपह्नुति–अर्थाअलंकारस्यमहत्वम् वैशिष्ट्यम् च प्रतिपादयितुं इच्छामि इति।

**उपक्रमः**

पण्डितराजजगन्नाथः आधुनिकचिन्तनमार्गप्रशस्तकारकः कविः इति प्रसिद्धः। पण्डितराजजगन्नाथः तैलङ्ब्राह्मणः आसीत्। पण्डितराजस्य पिता पेरुभट्टः

महान् आलङ्कारिकः कविश्च आसीत्। पण्डितराजस्य गुरुः स्वयं तस्य पिता; रसगंगाधरे उक्तं यथा–

"पाषाणादपि पीयूषं स्यन्दते यस्य लीलया।
तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरूम"। [3]

काव्यचिन्तनेन मूलपक्षतः काव्यस्य समीक्षात्मकचेतनायाः विकासाय तस्य पाण्डित्यं पूजनीयम्। पण्डितराजजगन्नाथस्य यद्यपि विविधशास्त्रेषु पाण्डित्यं आसीत्, तथापि साहित्यशास्त्रे अधिकं वर्तते स्म। तत् प्रमाणं तस्य सुप्रसिद्धग्रन्थे रसगंगाधरे द्रष्टुं शक्यते। पण्डितराजजगन्नाथः ज्ञानेन्द्रभिक्षोः समीपे वेदान्तविद्याया अध्ययनं कृतवान्। महेन्द्रसकाशात् न्यायवैशेषिकदर्शनविद्याम् अधितवान्। देवोपाध्यायात् पूर्वमीमांसा तथा शेषवीरेश्वरपण्डितात् व्याकरणशास्त्रमधीतवान्। रसगंगाधरे उक्तमेतत्।

"श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः,
काणादीराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्।
देवादेवाध्यभीष्ट स्मरहरनगरे शासनं जैमिनीयं,
शेषाङ्कप्राप्तशेषामलभणितिरभूत् सर्वविद्याधरो यः"।।[4]

**अलंकारस्य स्वरुपम् वैशिष्ट्यं च–**

अलङ्कारशब्दस्य निर्वचनम् अस्ति यथा– अलम् कृ घञ्। अलंकारः शव्दस्य निर्वचनम् भवति यत्–अलं करोति इति अलङ्कारः। काव्यप्रकाशकारः मम्मटोऽपि काव्यस्य लक्षणप्रसङ्गे कथयति–

"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"।[5]

अर्थात् ये शब्दार्थयुक्ताः भवन्ति ,परन्तु दोषरहिताः इति। तथा माधुर्य–ओज–प्रसादादि– गुणैः युक्ताः ते काव्यपदवाच्याः भवन्ति। ते अलंकारसहिताः भवितुम् शक्यन्ते। अलंकाररहिता अपि भवितुम् शक्यन्ते– अनलंकृती पुनः क्वापि इत्यर्थः।

एवं कथनेन आचार्यमम्मटस्य तात्पर्यं भवति यत्, अत्र रसस्य प्रधानता भवेत्। न अलंकारस्य प्रधानता तेन उक्तम्। अलंकारस्य स्पष्टं करणाऽभावात् काव्यस्वरूपे हानिः न भवति। परन्तु काव्यादर्शः तथा चन्द्रालोकः आदि अनेकग्रन्थाः अलंकारस्य प्रधानतां वदन्ति। तेषु चन्द्रालोककारजयदेवः काव्यप्रकाशस्य काव्यलक्षणं खण्डनं करोति यथा–

"अंगीकरोति यः काव्यं शब्दार्थावनलंकृताः।
अग्नौ न मन्यते कस्मादनुष्णमनलंकृताः"।।6

यथा अग्निः शीतलं भवितुं न शक्यम्। तथा काव्यं अलंकारशून्यं न भवितुम् शक्यते। अर्थात् काव्यं सर्वदा अलंकारयुक्तं भवेत्। अलंकारस्य भेदाः–मुख्यतः अलंकारस्य त्रयभेदाः वर्तन्ते। यथा–1.शब्दालंकारः, 2. अर्थालंकारः3. उभयालंकारः

**शब्दालंकारः**

यत्र तच्छब्दसत्वे तच्चमत्कारो भवति,तछब्दाभावे तदलंकारचमत्कारो न भवति, तत्र शब्दालंकारत्वम्। अर्थात् अत्र शब्दस्य प्रधानता वर्तते। यत्र शब्दसत्वे चमत्कारः भवति, तथा तस्य शब्दस्याऽभावे चमत्कारः न भवितुम् शक्यते। एकशव्दस्य परिवर्तनं कृत्वा तत्समानार्थकस्य अन्यशब्दस्य प्रयोगः भवति चेत् चमत्कारः नष्टं भवति। इत्युक्ते यत्र अलंकारे शब्दः न परिवर्तनं सहते, तत्र शब्दालंकारः। उदाहरणस्वरूपम्–अनुप्रासादि।अर्थात्–1. अनुप्रासः ,2.यमकम्, 3.श्लेषः

**अर्थालंकारः**– यत्र तु तच्छब्दपरिवर्तनेऽपि तत्समानार्थकः अन्यशब्दस्य सन्निवेशेऽपि न चमत्कारत्वहानिस्तत्रार्थालंकारत्वम्। यत्र शब्दपरिवर्तनं कुर्मः चेत्, तत्समानार्थकः अन्यशब्दस्य प्रयोगेन चमत्कारत्वे अन्तरं न भवति। अर्थात् यत्र तु शब्दपरिवर्तनेऽपि अलंकारत्वे न काऽपि क्षतिः तत्र अर्थालंकाराः इति। उदाहरणस्वरूपम्–उपमादि। 1.उपमा, 2.रूपकम्, 3.अपह्नुतिः, 4.उत्प्रेक्षा, 5.दृष्टान्तः, 6.व्यतिरेकः, 7.समासोक्ति 8. व्याजस्तुतिः, 9. अर्थान्तरन्यासः, 10.विभावना, 11.विशेषोक्तिः, 12.स्वभावोक्तिः आदि।

**उभयालंकारः–**

यत्र तु केचिच्छब्दाः शब्दपरिवृत्तिं सहन्ते, केचितु न सहन्ते तत्र शब्दार्थोभयालंकारत्वमिति। अर्थात् शब्दस्य परिवर्तनसहत्वे असहत्वे च शब्दार्थोभयालंकारत्वमिति। उभयालंकारस्तु पुनरुक्तदाभास एक एव।

**शृङ्गारविलासे अपह्नुतिः अलंकारस्य आनुप्रयोगः–**

भामिनीविलासस्य द्वितीयविलासः शृङ्गारविलासे अपह्नुतिः अलंकारस्यप्रयोगः पण्डितराजजगन्नाथेन अत्युत्तमरूपेण कृतम्। अपह्नुति–अलंकारः अर्थालंकारेषु आगच्छति। साहित्यदर्पणे विश्वनाथकविराजेन अपह्नुति–अलंकारस्य लक्षणं उक्तं यथा–

"प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः"।[7]

इयं द्विधा। क्वचिदपह्नवपूर्वक आरोपः, क्वचिदारोपपूर्वकोऽपह्नव इति। अर्थात् प्रकृतं इत्युक्ते उपमेयम् निषिध्य अन्योपमानस्य आरोपणम् एव अपह्नुतिः। क्रमेणोदाहरणम्–

'नेदं नभोमण्डलमम्वुराशिनैताश्च तारा नवफेनभङ्गाः।
नायं शशी कुण्डलितः फणीन्द्रो नासौ कलंकः शयितो मुरारिः'।।[8]

'एतद्विभाति चरमाचलचूडचुम्बि
हिण्डिर–पिण्ड–रुचि शीतमरीचिबिम्बम्।
उज्ज्वलितस्य रजनीं मदनानलस्य
धूमं दधत्प्रकटलाञ्छनकैतवेन'।।[9]

न इदं दृश्यमानं वस्तु आकाशमण्डलं,न जलनिधिः, न नक्षत्राणि, न नूतनडिण्डिरखण्डाः। अयं न तु चन्द्रमा, न कुण्डलितभुजगेश्वरः। न कलंकः,न तु सप्तमुरारिः। एतत् चरमाऽचलचूडचुम्बि फेनसमूहस्य इव कान्तियुक्तं दृश्यमानं चन्द्रमण्डलं। इदं चन्द्रमण्डलं रात्रौ प्रज्वलितस्य मदनानलस्य धूमं इव धारयत् सत् विभाति।अत्र प्रथमं आकाशमण्डलं आदि प्रकृतोपमेयस्य निषेधं कृत्वा पश्चात् अप्रकृत–उपमानस्य अर्थात् समुद्रादीनाम् स्थापनत्वात् अपह्नुतिः। अयं तु प्रथमं भेदः वर्तते। द्वितीयभेदे धूमरूपउपमानस्य आरोपणं कृत्वा पश्चात् कैतवशब्देन कलंकरूपः उपमेयस्य अपह्वं इति अपह्नुतिः अलंकारः। काव्यप्रकाशे मम्मटः अपि अपह्नुतिः अलंकारस्य लक्षणं प्रददाति। यथा–

'प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुतिः'।[10]

अर्थात् उपमेयस्य असत्यरूपेण स्थापनं कृत्वा ,यत्र उपमानस्य सत्यरूपेणस्थापनं भवति। तत्र तु अपह्नुतिः अलंकारः। उदाहरणं यथा–

P: ISSN NO.: 2321-290X RNI : UPBIL/2013/55327 VOL-6* ISSUE-8* (Part-1) April- 2019
E: ISSN NO.: 2349-980X **Shrinkhla Ek Shodhparak Vaicharik Patrika**

'स्मितन्नैतत् किन्तु प्रकृतिरमणीयं विकशितम्
मुखम्ब्रूते को वा कुसुममिदमुद्यत्परिमलम्।
स्तनद्वन्द्वम्मिथ्या कनकनिभमेतत् फलयुगं
लता सेयं रम्या भ्रमरकुलनम्या न रमणी'।।[11]

एतत् स्मितम् न किन्तु प्रकृतिरमणीयं विकसितम्। कः इदम् उद्यत्परिमलम् कुसुमम् मुखम् तथा,एतत् कनकनिभम् फलयुगम् स्तनद्वयम् च मिथ्या ब्रूते? इयम् भ्रमरकुलनम्या रम्या लता, सा न रमणी। अर्थात् उपमेयस्य असत्य रूपेण स्थापनं कृत्वा,उपमानस्य सत्यरूपेण स्थापनं इति भावः। अत्र अपह्नुतिः अलंकारस्य प्रयोगः भवति।रमण्याः स्तनयोः उपमेयस्य निषेधं कृत्वा लतायाम् स्वर्णसदृशं द्वे फलम् इति उपमानस्य स्थापनं कृतम्। रमण्याः स्मितम् उपमेयस्य निषिध्य स्वभावतः रमणीयविकासम् इति उपमानस्य स्थापनं वर्णितं। उपमेयः इत्यक्ते यस्य तुलना क्रीयते। साधारणधर्मः इत्युक्ते उपमानः तथा उपमेययोः द्वयोः मध्ये स्थितः साधारणधर्मः। मुखम् चन्द्रः इव। अत्र मुखम् उपमेयः। चन्द्रः उपमानः। यथा सौन्दर्यादयः साधारणधर्मः।

भामिनीविलासे अपह्नुतिः अलंकारप्रयोगस्य अन्योदाहरणमं यथा–

'श्यामं सितञ्च सुदृशो न दृशोः स्वरूपम्
किन्तु स्फुटङ्गरलमेतदथामृतं च।
नो चेत् कथन्निपतनादयोस्तदैव
मोहम्मुदंच नितरान्दधते युवानः'।।[12]

एतत् श्यामम् च सितम् सुदृशः दृशोः स्वरूपम् न, किन्तु स्फुटम् गरलम् अथ च अमृतम् अस्ति। नो चेत् युवानः अनयोः निपतनात् तदा एव मोहम् च मुदम् कथं धत्ते?अत्र कविः सुनयनयाः नेत्रयोः निषिध्य स्पष्टरूपेण गरलम् तथा अमृतम् इति प्रकाशितं। अत्र उपमेयस्य सुदृशो न दृशो एतस्य निषिध्य स्फुटङ्गरलमेतथामृतं इति उपमानस्य स्थापनं भवति। अतः अपह्नुतिः अलंकारस्य प्रयोगः दरीदृश्यते।

**उपसंहारः**

इत्थं अपह्नुति–अलंकारस्य वैशिष्ट्यम् वर्तते येन, काव्ये शिल्पत्वस्यातिशयता भवति। अर्थात् कविसहृदययोः तार्किकशक्तेः विकासः जायते। तर्कविद्यावलेन भावयित्री कारयित्री च उभयोः प्रतिभयोः वर्णनाबोधनचातुर्यं तथा संस्कृतकाव्यलेखनपरम्परायामैश्यर्यस्वरूपं वैशिष्ट्यम् च प्रतिपादयति। अपह्नुतिः अलंकारः कवेः पाण्डित्यं, सहृदयस्य सहृदयत्वं च प्रमाणीकरोति। अतः निष्कर्षरूपेण वदितुम् शक्यते यत् अपह्नुति–अलंकारः कवि–सहृदययोः कृते विद्वद्वौषधम् एव। इति भामिनीविलासे अपह्नुतिः अलंकारः।

**पाद टिप्पणी**

1. *यानस्थानासनादीनां मुखनेत्रादिकर्मणाम्। विशेषस्तु विलासः स्यादिष्टसन्दर्शनादिना।। साहित्यदर्पणम्, 99 तृतीयपरिच्छेदः*
2. *उपकुर्वन्ति तं सन्न येऽङ्गद्वारेण जातुचित्। हारादिवदलङ्कारास्तेऽनुप्रासोपमादयः।। इति।। साहित्यदर्पणम्, दशमपरिच्छेदः*
3. *पाषाणादपि पीयूषं स्यन्दते यस्य लीलया। तं वन्दे पेरुभट्टाख्यं लक्ष्मीकान्तं महागुरुम्।। रसगङ्गाधरः, 3 प्रथममाननम्*
4. *श्रीमज्ज्ञानेन्द्रभिक्षोरधिगतसकलब्रह्मविद्याप्रपञ्चः, काणादिराक्षपादीरपि गहनगिरो यो महेन्द्रादवेदीत्। देवादेवाध्यभीष्ट स्मरहरनगरे शासनं जैमिनीयं, शेषाङ्कप्राप्तशेषामलभणितिरभुत् सर्वविद्याधरो यः।। रसगङ्गाधरः, 2 प्रथममाननम्*
5. *"तददोषौ शब्दार्थौ सगुणावनलङ्कृती पुनः क्वापि"।काव्यप्रकाशः,प्रथमोल्लासः*
6. *अंगीकरोति यः काव्यं शब्दार्थावनलंकृताः। अग्नौ मन्यते कस्मादनुष्णमनलंकृताः।। चन्द्रालोकः, जयदेवः*
7. *"प्रकृतं प्रतिषिध्यान्यस्थापनं स्यादपह्नुतिः। साहित्यदर्पणम्,दशमपरिच्छेदः*
8. *'नेदं नभोमण्डलमम्बुराशिनैताश्च तारा नवफेनभङ्गाः। नायं शशी कुण्डलितः फणीन्द्रो नासौ कलंकः शयितोमुरारिः'।। साहित्यदर्पणम्,दशमपरिच्छेदः*
9. *'एतद्विभाति चरमाचलचूडचुम्बि हिण्डिर–पिण्ड–रुचि शीतमरीचिबिम्बम्। उज्ज्वलितस्य रजनीं मदनानलस्य धूमं दधत्प्रकटलाञ्छनकैतवेन'।। साहित्यदर्पणम्, दशमपरिच्छेदः*
10. *'प्रकृतं यन्निषिध्यान्यत् साध्यते सा त्वपह्नुति'। काव्यप्रकाशः*
11. *'स्मितन्नैतत् किन्तु प्रकृतिरमणीयं विकशितम् मुखम्ब्रूते को वा कुसुममिदमुद्यत्परिमलम्। स्तनद्वन्द्वम्मिथ्या कनकनिभमेतत् फलयुगं लता सेयं रम्या भ्रमरकुलनम्या न रमणी'।।74 भामिनीविलासः, श्रृंगारविलासः*
12. *'श्यामं सितञ्च सुदृशो न दृशोः स्वरूपम् किन्तु स्फुटङ्गरलमेतदथामृतं च। नो चेत् कथन्निपतनादयोस्तदैव मोहम्मुदंच नितरान्दधते युवानः'।। 76 भामिनीविलासः, श्रृंगारविलासः*

**सन्दर्भ ग्रंथ सूची**

*'प्रकाश'–हिन्दीव्याख्यापेतः श्री राधेश्याम मिश्रप्रणीतं 'भामिनीविलासः', चौखम्वा संस्कृत संस्थान, वाराणसी।*

*'चन्द्रकला' सस्कृत–हिन्दीव्याख्योपेतम्, आचार्यशेषराजशर्मा रेग्मीप्रणीतं साहित्यदर्पणम्, चैखम्बा कृष्णदास आकादमी वाराणसी।*

*पं. रघुनाथप्रसादः चतुर्वेदीप्रणीतः काव्यप्रकाशः,, चौखम्वा संस्कृत संस्थान, वाराणसी।*

*अलंकारमञ्जरी संस्कृतहिन्दीव्याख्याकारः, पं श्री जगन्नाथशास्त्री तैलङ्गः।*

*पण्डितराजजगन्नाथ ग्रन्थावली, चौखम्वा कृष्णदासी, वाराणसी।*

*पण्डितराजजगन्नाथग्रन्थावली, चौखम्वा कृष्णदासी, वाराणसी।*